.. abhyAsapAThaH 29 ..

॥ अभ्यासपाठः २९ ॥

प्रयोगपरिवर्तनं कुर्वन्तु ।

१ सः विद्यालयं गच्छति ।

२ बालः कथां पठति ।

३ लता पत्रम्लिखति ।

४ छात्रः नियमं पालयति ।

५ सा रसं पिबति ।

६ एषः पाकं करोति ।

७ अर्चकः पूजां करोति ।

८ सेवकः सेवां करोति ।

९ गृहिणी तुलसीं नमति ।

१० अहं शब्दं स्मरामि ।

११ अहं काकं पश्यामि ।

१२ अहं कथां वदामि ।

१३ सा मालां रचयति ।

१४ सः पत्रिकां पठति ।

१५ एषः कोलाहलं करोति ।

१६ सज्जनः धर्मं पालयति ।

१७ दुर्जनः खेदम् अनुभवति ।

१८ रक्षकः चोरं गृह्णाति ।

१९ चोरः हारम् अपहरति ।

२० सर्पः मण्डूकं खादति ।

२१ हरिणः व्याघ्रं पश्यति ।

२२ अहं लेखनीं क्रीणामि ।

२३ सः वादं करोति ।

२४ न्यायाधील्अः न्यायम् वदति ।

२५ सा शर्कराम् इच्छति ।

२६ एषः पाठम् म् इच्छति ।

२७ एषा नदीम् इच्छति ।

२८ अहं गीताम् इच्छामि ।

२९ बालिका शाटिकाम् इच्छति ।

३० लता मालाम् इच्छति ।

३१ भगिनी हारं क्रीणाति ।

३२ सा शाकं क्रीणाति ।

३३ भक्तः गन्धवर्तिकां क्रीणाति ।

३४ गृहस्थः पत्रिकां क्रीणाति ।

३५ अहं स्यूतं क्रीणाति ।

३६ यानं शब्दं करोति ।

३७ भक्तः नमस्कारं करोति ।

३८ दरिद्रः कटं करोति ।

३९ धनिकः गर्वं करोति ।

४० सा हारं क्रीणाति ।

४१ सा दूरवाणीं करोति ।

४२ बालः तण्डुलं क्रीणाति ।

४३ मुनिवरः जपं करोति ।

४४ अहं सुधाखन्डं क्रीणामि ।

४५ अहं सेवां करोमि ।

४६ धीवरः मीनं गृह्णाति ।

४७ अन्धः दण्डं गृह्णाति ।

४८ सः अन्यं गृह्णाति ।

४९ सा कलशं गृह्णाति ।

५० एषः गीतां जानाति ।

५१ देवः सर्वं जानाति ।

५२ सा पाठं शृणोति ।

५३ भवान् शब्दं शृणोति ।

५४ भवती कथां शृणोति ।

५५ सः एतं जानाति ।

५६ एषः तं सूचयति ।

५७ रामः तम् आह्वयति ।

५८ अम्बा पुत्रम् आव्ह्वयति ।

५९ पुत्रः स्नेहितम् आह्वयति ।

६० सा स्यूतं नयति ।

६१ भीतः आरक्षकम् आह्वयति ।

६२ धनिकः सेवकम् आह्वयति ।

६३ भगिनी मालां नयति ।

६४ सः भवन्तम् आह्वयति ।

६५ सा भवतीम् आह्वयति ।

६६ कः कथां जानाति ?

६७ कः निन्दां करोति ?

६८ का कङ्कतिकां स्वीकरोति ?

६९ का पाकं करोति ?

७० सः कम् आह्वयति ?

७१ कर्मकरी कां निन्दति ?

७२ सा कां पश्यति ?

७३ भवतः देवीं नमस्करोति ।

७४ पण्डितः वादं परिटकरोति ।

७५ सा ग्रन्थं स्वीकरोति ।

७६ एषः घण्टां वादयति ।

७७ सा बालकं ताडयति ।

७८ चोरः पेटिकां चोरयति ।

७९ अध्यापकः छात्रं बोधयति ।

८० सा तां सूचयति ।

८१ एषा ग्रन्थं परिशीलयति ।

८२ सः दुष्टं बहिष्करोति ।

८३ चोरः अपराधम् अङ्गीकरोति ।

८४ सः दुष्टं धिवकरोति ।

Encoded by Sarada Susarla
sai@cs.utah.edu

Last updated August 15, 2003